## संस्कृत वार्ताः

**दिनाङ्क : 12/03/2026**

**सायम् - 06:20**

| |
|---|
| **इयम् आकाशवाणी** |
| **सम्प्रति: वार्ताः श्रूयन्ताम्** |
| **प्रवाचिका - वन्दना कश्यप:** |

-

-

### आदौ मुख्यवार्ता:

- विदेशमन्त्री डा. एस्. जयशङ्करः, तस्य इरानी समकक्षी सैयद्-अब्बास्-अराघ्ची च स्वस्य अन्तिमसंवादे नौवहनस्य सुरक्षायाः, भारतस्य ऊर्जा-सुरक्षायाः च विषयेषु चर्चां कृतवन्तः।
- मुम्बई-पोताश्रये खनिजतैलपूर्णस्य पोतस्य सुरक्षितम् आगमनम् अभवत्। गतदिने एकः विशालः खनिजतैल-पोतः मुम्बई-नगरं प्राप्तवान्।
- ईरान-देशस्य सामुद्रिक-आक्रमणेन पश्चिम-एशिया-क्षेत्रे सङ्घर्षः वर्धितः।
- राष्ट्रपतिः द्रौपदी मुर्मू महोदया कृषि-क्षेत्रे महिलानां भूमिकां वर्धयितुं उद्घोषं कृतवती।
- **अपि च,**
- स्विस्-ओपन-बैड्मिण्टन-प्रतिस्पर्धायां, भारतस्य किरण-जॉर्ज इत्येष: अद्य रात्रौ पुरुष-एकलस्य प्रागुपांन्त्य-चक्रे, हाङ्ग्-काङ्ग् देशस्य जेसन्-गुनावन-इत्यनेन सह स्पर्धयिष्यति।

### अथ वार्ता: विस्तरेण

**विदेशमन्त्री**

विदेशमन्त्री डा. एस्. जयशङ्करः, तस्य इरानी समकक्षी सैयद्-अब्बास्-अराघ्ची च स्वस्य अन्तिमसंवादे नौवहनस्य सुरक्षायाः, भारतस्य ऊर्जा-सुरक्षायाः च विषयेषु चर्चां कृतवन्तः। अद्य अपराह्णे नवदेहली-नगरे प्रसारमाध्यमेन वार्तालापं कुर्वन् विदेशमन्त्रालयस्य प्रवक्ता रणधीर-जयसवाल: इत्येषः अवदत् यत् गतदिनेषु द्वौ अपि मन्त्रिणौ परस्पर-वार्तालापं कृतवन्तौ इति।

श्री जयसवाल: अवदत् यत् ईरान-देशे प्रायः नव सहस्राणि भारतीयाः नागरिकाः सन्ति तथा च भारतसर्वकारेण अनेके भारतीयाः तेहरान-नगरात सुरक्षितस्थानानि प्रति स्थानान्तरिताः सन्ति। ये अजबैजान्-आर्मेनिया-देशयोः मार्गेण गन्तुम् इच्छन्ति तेभ्यः अपि वीसा-द्वारा, स्थलसीमायां च गन्तुं साहाय्यं करोति येन ते वाणिज्यिक-विमानयानानि पुनः प्राप्तुं शक्नुवन्ति। प्रवक्ता इतोऽपि सूचितवान् यत् द्वन्द्वस्य आरम्भात् परं प्रधानमन्त्री नरेन्द्रमोदी उपत्यक-प्रदेशस्य अनेकै: नेतृभिः सह वार्तालापम् अकरोत् इति।

**मुम्बई-पोताश्रयः**

मुम्बई-पोताश्रये खनिजतैलपूर्णस्य पोतस्य सुरक्षितम् आगमनम् अभवत्। गतदिने एकः विशालः खनिजतैल-पोतः मुम्बई-नगरं प्राप्तवान्। एषः पोतः सामरिकदृष्ट्या महत्त्वपूर्णस्य 'होर्मुज-जलसन्धि:' इत्यस्यमिन् मार्गेण सुरक्षिततया आगच्छत्। अमेरिका-इजरायल-देशाभ्यां ईरान-उपरि कृताआक्रमणेभ्यः परं भारतम् आगच्छन् एषः प्रथमः पोतः अस्ति।

मुम्बई-पोताश्रयस्य अधिकारिणः सूचितवन्तः यत् अस्मिन् पोते प्रायः एकलक्ष मीट्रिक-टन परिमितं खनिजतैलम् अस्ति। सम्प्रति एषः पोतः 'जवाहर-द्वीप' स्थाने अस्ति, तत्र तैल-निक्षेपणस्य कार्यं प्रचलति।

**पश्चिम-एशिया**

ईरान-देशस्य सामुद्रिक-आक्रमणेन पश्चिम-एशिया-क्षेत्रे सङ्घर्षः वर्धितः। अस्मिन् सङ्घर्षे एकः भारतीय-नाविकः मृतः।

इराक-देशस्य बसरा-समीपे अमेरिका-देशस्य तैल-पोतस्य उपरि जाते आक्रमणे एकः भारतीयः वीरगतिं प्राप्तवान्। इराक-स्थितेन भारतीय-दूतावासेन उक्तं यत् पोते स्थिताः अन्ये पंचदश भारतीयाः सुरक्षिताः सन्ति, तेषां उद्धारः कृतः च।

अपरपक्षे, अद्य प्रातः दुबई-नगरस्य 'क्रीक-हार्बर' समीपे अपि द्रोण-आक्रमणम् अभवत्, किन्तु तत्र कोऽपि हतः न जातः। अमेरिका-राष्ट्रपतिः डोनाल्ड-ट्रम्पः सङ्केतितवान् यत् एषः युद्धः शीघ्रमेव समाप्तो भविष्यति।

**राष्ट्रपतिः**

राष्ट्रपतिः द्रौपदी मुर्मू महोदया कृषि-क्षेत्रे महिलानां भूमिकां वर्धयितुं उद्घोषं कृतवती। नवदेहली-नगरे अद्य 'कृषि-खाद्य-प्रणाल्यां महिलानां भूमिका' इति त्रि-दिवसीयस्य वैश्विक-सम्मेलनस्य उद्घाटनं कृत्वा राष्ट्रपतिः उक्तवती यत् नीति-निर्धारणे, निर्णय-प्रक्रियासु, नेतृत्व-पदेषु च महिलानां सहभागिता आवश्यकी अस्ति।

राष्ट्रपतिः उक्तवती यत् सर्वेषु स्तरेषु महिलानां सक्रियता लैङ्गिक-समावेशी कृषि-विकासं वर्धयिष्यति। सा संसूचितवती यत् विश्वे जनाः-ग्रहाः-समृद्धिः-शान्तिः-सहभागिता चेत्येतेषु पञ्च-विषयेषु समानं बलं दातव्यम्। कृषिक्षेत्रं समेत्य सर्वेषु क्षेत्रेषु महिलानां समावेशनेन एषः संसारः अधिकं संवेदनशीलः सामञ्जस्यपूर्णः च भविष्यति। कृषि-कल्याणमन्त्री शिवराजसिंह चौहानः अवदत् यत् एषः मञ्चः राष्ट्रस्य अनुसन्धान-क्षेत्रे महिला-केन्द्रित-कार्येभ्यः गतिं प्रदास्यति।

**प्रधानमन्त्री नरेन्द्रमोदी**

प्रधानमन्त्री नरेन्द्रमोदी श्वः असम-राज्यस्य गुवाहाटी-नगरात् पी.एम-किसान-योजनायाः द्वाविंशतितमम् अनुभागपूर्तिं विमोचयिष्यति। अद्य प्रातः नवदेहल्यां वार्ता-सम्मेलने कृषि-कल्याणमन्त्री शिवराजसिंह-चौहानः इतस्य घोषणाम् अकरोत्। सः अवदत् यत् प्रधानमन्त्री प्रायः अष्टादश-सहस्र-कोटि-रूप्यकाणि प्रत्यक्ष-लाभ-हस्तान्तरण-प्रक्रियया (DBT) प्रायः नव कोटि-कृषकाणां कोषेभ्यः प्रेषयिष्यति। अनेन सहैव सर्वकारेण 'भारत-विस्तार' (Bharat Vistar) इति ए.आई-आधारित-डिजिटल-मञ्चस्य प्रथम-चरणस्य शुभारम्भः कृतः, येन कृषकाः कृषि-सम्बद्धान् प्रश्नान् समाधातुं शक्ष्यन्ति ।

**फारूक-अब्दुल्ला**

राज्यसभायाः नेता जे.पी. नड्डा जम्मु-काश्मीरस्य पूर्वमुख्यमन्त्री फारूक-अब्दुल्ला-महोदयस्य उपरि जातस्य आक्रमणस्य विषये उच्चस्तरीयान्वेषणं कर्तुं आश्वासनं दत्तवान्।

विपक्षस्य नेता मल्लिकार्जुन-खड़गे महोदयः शून्यकाले जम्मु-काश्मीरे नियम -व्यवस्थायाः स्थितिं फारूक-अब्दुल्ला-महोदयस्य उपरि प्राणघातक-आक्रमणस्य च विषयं उत्थापितवान्। तस्य उत्तरं यच्छन् नड्डा-महोदयः अवदत् यत् सर्वकारः एतं विषयं अतिगम्भीरतया गृह्णाति। किन्तु, सः विपक्षस्य आलोचनां कुर्वन् अवदत् यत् एतस्याः घटनायाः राजनीतीकरणं नैव करणीयम्।

गतसायङ्काले जम्मु-नगरे एकस्मिन् विवाह-समारोहे फारूक-अब्दुल्ला-महोदयस्य उपरि एकेन भिशुंडीधारिणा गोलिका-प्रहारः कृतः, किन्तु सः चमत्कारिकरूपेण सुरक्षितः अस्ति।

**ऋतु-विज्ञान**

भारतीय-ऋतु-विज्ञान-विभागेन श्वः गुजरातराज्ये उष्णतरङ्गस्य स्थितिः अनुमानिता अस्ति। श्वः अरुणाचलप्रदेश-असम-मेघालयराज्येषु च प्रचण्डवृष्टिः भविष्यति इति संस्थया पूर्वानुमानितम् अस्ति। भारतीय-ऋतु-विज्ञान-विभागानुसारं अग्रिमेषु त्रिषु दिनेषु छत्तीसगढ-उपहिमालयी- पश्चिमबङ्ग-विदर्भ-सिक्किम्-नागालैण्ड्-मणिपुर-मिजोराम्-त्रिपुराराज्येषु च मेघावृष्टेः विद्युतस्य च आशङ्का अपि वर्तते। पूर्व-ईशान्य-भारते च तापमानं द्वितःत्रि-डिग्री-पर्यन्तं वर्धेत इत्यपि अपि अनुमानितम्।

**स्विस् ओपन्**

षड्विंशत्यधिक-द्विसहस्र-तमस्य-वर्षस्य स्विस्-ओपन-बैड्मिण्टन-प्रतिस्पर्धायां, भारतस्य किरण-जॉर्ज इत्येषः अद्य रात्रौ पुरुष-एकलस्य प्रागुपांन्त्य-चक्रे, हाङ्ग्-काङ्ग् देशस्य जेसन्-गुनावन-इत्यनेन सह स्पर्धयिष्यति। किरणः गतरात्रौ सिङ्गापुरस्य पूर्वविश्वविजेता लो-कीन्-यू इत्येतं पराजयत। अद्य रात्रौ चीनदेशस्य गावो जिया ज़ुआन् तथा वू मेङ्ग् यिङ्ग् इत्येतौ द्वयं सम्मुखी करिष्यति। महिला-एकल-क्रीडायां थाय्ल्याण्ड्-देशस्य पोन्पावी चोचुवोंग् इत्येषा मालविका बन्सोड् इत्येनं द्वारा पराजयत।

**॥ इति वार्ताः ॥**